॥१॥

श्रीहरिविक्रमायनमः॥ यस्मात्त्वयातपतिते तपनो हिमांशुः त्वांते: करैः स्तवयतिपुरुदप्रतापं॥ वातिप्रकर्षमप
हाय समीरणो ऽपि धर्मा विनावृक्रमहं हरिविक्रमभीडे॥१॥ उपेति वकुलो ऽदभ्रमवलेपोगर्वो येषांतैः अदभ्रं बकु
लं च कुरिसमरः अवलेपस्फुरत्वंस्या ह्वेपने भूधरो ऽपि चेतिमे दिनी तैः पूर्वोक्तैरस्फुरैः उपप्लुताः पीडिताः वयंत्व
दीयाः केशानां व्रजाः समूहास्तेषामुच्छेदे विनाशने पटुपरं श्रेष्ठं गुणत्वं भक्तजनानामस्मा यमिसक्ततेऽपिच
क्रमानिनं त्वां पुरापूर्वं शरणं ईता: गोपगणाद्द्वाहेर्द्रत्रारणं रक्षिता रंत्रारणं गृहरक्षित्रीरिसमरः प्राप्ताः

उपप्लुतास्तैर्वकुलावलेपैः प्राप्तास्त्वदीयाः शरणं गुणज्ञम्॥ केशव्रजोच्छेदपटुं परंत्वां पुरा ईतागोपगणाद्दूवे
त्र॥१॥ स्फुरत्तरेत्तिहृ निसर्गवैरिवृत्तैरिवग्राहतिमिंगिलैर्नः॥ निमज्जमानानाम् विपदंबुराशौ त्वमुद्धरान्तो निनक
र्णधारः॥२॥ १॥ स्फुरत्तरइति जिह्मः कुटिलो निसर्गः स्वभावो येषांतेच ते वैरिव्रजाश्चतैः ग्राहाश्चतिमिंगिलाम
त्स्याश्चतैस्तद्रूपैरिसर्थः यद्वाग्राहास्तिमिंगिलाइव येषुतैः स्फुरत्तरेतरणानर्हे विपदंबुराशौ विपत्समुद्रे तस्मिन् निम
ज्जमानानात्रं हेतः नोऽस्मान् कर्णधारोना विकरुद्वित्वमेवा उद्धर भवानेवापद्ग्ऽऽस्मदुद्धारकोऽस्तिनान्यः कश्चना
पीसर्थः अत्रोपमालंकारः अत्रक्वचिदिदंवृत्तोपेंद्रवज्रोपत्तातिष्ठ॥२॥ 

अरातीति अरातिभ्यो युद्धकरधिकत्रासो भयं तेनहृतः प्रसादश्चित्तनैर्मल्यंयस्मतं तं धर्मदेवम् श्रीदेवकीसूनुः
कृष्णः उदाजहार जगाद किमित्यपेक्षायामाह त्वं मेति हे धर्म माभैः अस्फैः कृतत्रासकरस्तस्मादसुरकृतादित्य
र्थः अन्नार्मणांदुःखानां यूगः समूहस्तस्मात् त्वदीयंभावत्कम् अवनं रक्षणम् विधास्येकरिष्येइति॥३॥ मदिति
मयियः पूर्वं वैरस्य पूर्वजन्मकृतवैरभावस्याभिनिवेशो ऽनुध्यानं स विद्यते येषां ते तेऽसुराः मात्सर्येणाभवदुत्क
र्षासहनरूपेण जुष्टाः सेविताः निस्ममर्षवंत इत्यर्थः मे मम पराभवम् विधित्सवः प्रकर्षेण विधातुमिच्छंतः सु

अराप्तुरत्रासहृतः प्रसादं श्रीदेवकीसूनुरुदाजहार॥ अन्नार्मयूगादवनं विधास्ये माभैस्त्वमित्यासुरतस्त्वदीय
म्॥३॥ मत्पूर्ववैराभिनिवेशवंतः पराभवं मे प्रविधित्सवस्ते॥ विज्ञाय भूभारभुवो ऽर्दयंतिमात्सर्यमुष्टाः किलवोम
दीयान्॥४॥ स्थितिंगतानां च कृतव्रतानां ध्यानैः दत्ताकम्पितसिद्धचेष्टैः॥ तेषां प्रतिष्ठादितपातकानां हन्तावरी
याक्षिमतां च दर्पम्॥५॥ वः पृथिव्या भारो याभिस्तथाभूताभुवो जन्मानि येषांते यद्वाभूभाराणां भुवः स्थानभूताः
संतः मदीयान्मामकान् इमेभगवदीया इति जगत्सुसिद्धानित्यर्थः वो युष्मान् विज्ञाय ज्ञात्वा अर्दयंतिपीडयंतिकि
लअसुरणां भूभारभूतत्वं सुकं भागवतेने भूभारराजपृतनादिति भूपैर्भाराप्यमाणानां भूभारसुरराजसेसादिभिः॥४॥ स्थि

॥२॥ तिमितिजगत्सांपृथिव्यांजनवंचनायेतितृीयः वकवत्वलाकेस्कन्धम् वलाकस्थ्व कोमतइतित्राम्यूतः ध्याने
चित्तप्रणिधानेस्थितिंनिष्ठुंगतानांप्राप्तानाम् रूक्मिनानर्तकेरिवोपरिषाडुचिताः सिद्धानामिवस्थितपुरुषाणा
मिवयेवैत्राम्तेः अरतांत्रिष्मोदरपूरणायभ्रमताम्प्रतिष्ठाद्दिताविपातकानिपरांगनासंगादीनियैस्तैतेषाम्॥
अंवरीषाक्षिमतोभ्राष्टुवस्तदीप्तनेत्रवताम्। अंवरीषः पुमानभ्राष्टुमितिवोपालितः तेषाममूर्षंताममकराणा
मृदर्पमदीयजनपीडोत्पादनप्रभृतगर्वम् हर्त्ताहरिष्येमुकुमुकुरनेकावज्ञारैस्तद्दर्पहननेऽपिनिर्लज्जतयापुनः पुन

नेषांविघातायमदीक्षतानांमदंतरामस्थूलकर्मभाजां॥ विनिर्णितंकोप्यसतांनवृन्द्रैमयासकार्यैमनसीतिवि
दधु॥६॥ ईर्पयस्तैः स्वीकृत्वासुनरपिहरिष्यामितिभावः॥५॥ तन्नुत्रकोपतवेवाभिमानस्तत्राहतेषामितिच्छ
लः छलनंलोकप्रतारणंतदेवकर्मक्रियातत्भजंतीतितेषाम् कर्मभाष्येक्रियायांचपुनःपुंसकर्यामतमितिरु
द्रः मदेनलोकेआत्मनोनिवारकजनाभावाद्दृढ्नूतेवतेनोदृतानाम् तेषामसकराणाम् विघातायविनाशंकर्तुं
मदंतरामहत्तेअन्योऽपरः कोऽपिजनोदेवोवान्यकः समर्थोनास्ति अतोऽसतांपविनाशः मयाकार्यः इतिहेविष्णु
मनसिमयाविनिर्णितंनिश्चितमेवअत्रासतांतेषांविघातायमहत्तेकोऽपिनत्रान्कः इतिपदार्थस्पतत्द्विनाशंप्रति ॥२॥

हेत्वस्त्वासदार्थहेतुकंकाव्यलिंगमलंकारः॥६॥ ततइतिततः निश्चितत्वाद्धेतोः क्षमायांचसंधरायाम्। तवेयंत्व
दीयाआत्मजस्यभावआत्मजतासाचासौसाचतां यदुतवायंत्वदीयः सचासावात्मजः स्वतस्यभावस्तत्ताता
मुउपेत्यगत्वाद्धृष्टंसतद्रोहित्वादुष्टभावांतदीयतेषामसकराणापिमंमकलंसमग्रम् वंशमन्ववायम् वंशोऽन्व
वायः संतानइत्यमरः आश्रमंश्रमरहितंयथासात्तथानुन्मूलयिष्येमूलतउत्सारयिष्यामि अत्रैर्मुनेस्तनूजो
ऽत्रितनूजोदुर्वासास्तस्यशापस्तस्मात् त्वांधर्मावतारंभवंतम् मोचयिष्येतच्छापतोमुक्तिंकरिष्यामीत्यर्थः॥७

ततस्त्वदीयात्मजतांक्षमायामुपेत्यवंशंसकलंतदीयं॥ उन्मूलयिष्येऽश्रममेवदुष्टंत्वांमोचयिष्येऽत्रितनूजशा
पात्॥७॥ संस्थापयिष्येऽस्तमुपेतमुर्व्यांनिर्वाणहेतुंसमयेनधर्मं॥ एकांतिकंतेनतिरोबभूवेतत्रेरयित्वेतिजग
द्विनेत्रा॥८॥ संस्थेतिसमयेनकालेनसमयाः शपथाचारकालसिद्धांतसंविदइत्यमरः अस्तंनाशाम् उपेतंप्राप्त
मुनिर्वाणस्यमोक्षस्यहेतुः कारणंतम् मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् मोक्षोपवर्गइत्यमरः॥ अं
~~स्तनामस्मृउपेतंस्वामस्य निर्वाणस्यमोक्षस्यहेतुः कारणंतम्~~ एकांतिकमेकादृशास्कंधोक्तमेकांतिकाचरणी
यंधर्मउर्व्यांपृथिव्याम् संस्थापयिष्येपुनः स्थापयिष्यामि इत्यमुनाप्रकारेणईरयित्वोक्त्वाद्विनेत्रेणनयतिवि

निमयतीतिविनेता जगतांजनानांविनेतातेनवृंदावनविहारिणाक्रमेण तिरोबभूवेंतर्हितमभूत् ॥८॥ प्रीतइ
तिततोभगवत्तिरोधानानंतरम् सधर्मदेवः प्रीतः प्रसन्नः सन् आत्मनीनंस्वकीयम् सद्भगवत्प्रसन्नताहेतु
त्वात्समीचीनंचवृत्तंवृत्तंसमाप्यसमाप्तिंकृत्वाचित्रैर्नानाविधैः प्रचुराणिबहूलान्यास्यानियेषुतानिचतानि
भोज्यानिचतुर्विधान्नानितैः पुरूणिचतेभूमिदेवाब्राह्मणास्तान् पुरुहूपुरुभूयिष्ठमित्यमरः संतर्पयि
त्वातृप्तान्विधायपुण्यांभगवद्दर्शनात्पुण्यतमामतिबुद्धिर्यस्यसः सधर्मः पारणंउपवासनिवृत्तिम् अध

प्रीतस्ततः सद्वृत्तमात्मनीनंसमाप्यचित्रैः प्रचुरान्नभोज्यैः ॥ संतर्पयित्वापुरुभूमिदेवान्सपारणांपुण्यमति
र्व्यधत्त ॥९॥ सतानतिप्रीतियुजः प्रकामंसर्वानमरिपन्नमनिरस्ततंद्रीः ॥ प्रशान्तसत्त्वः सहनिर्व्यलीकस्तया
निजागारमथप्रतस्थे ॥१०॥
सन्नुतवान् ॥९॥ सइति अथानंतरम् सएवंभगवत्कृपापात्रोधर्मदेवः निर
स्तासत्कातंद्रिरालस्यंयेनतथोक्तः सन् असत्निवृत्तायितयाप्रीत्यायुक्तान्इतितान्सर्वान्मित्राणिपरिष्वज्य
लिंग्यप्रकामंप्रशान्तंसत्त्वमंतःकरणंस्वभावोवायस्यतथाविधः सन्सत्त्वोऽस्त्रीजंतुषुन्क्लीबेव्यवसायेपरा
क्रमे आत्मभावेपिशाचादौद्रव्येसत्तास्वभावयोः प्राणेष्वलेंतःकरणेवैत्तयंती निर्गतव्यलीकमप्रियंदुःख ॥२॥

यस्यतथाविधःसन् व्यलीकमप्रियाकार्यवैलक्ष्येष्वितिविश्वः अलीकमप्रियेऽपिस्यादितिमेदिनीदृष्टश्रुतु
नितरांनिर्गोपतोगतमलीकंयस्येतिसमासयद्यपिअलीकंह्रस्वदीर्घमध्यमितिराजदेवस्तथाप्यत्रछंदोनु
रोधाद्दीर्घएवनिजमात्मीयंचतदगारंभवनंभवनागारमंदिरमित्यमरः तयास्त्रियासहप्रतस्थेजगाम ॥१०॥
उपेयिवानिति सधर्मदेवः रंकवोमृगास्तेषांराजानोरंकुराजास्तैः राजाहः सखिभ्यष्टच्सिद्धेरित्यर्थः अनेक
याहस्तिनस्तेषांव्रजैःसमूहैः अनेकपोद्विपइत्यमरः वाराहाः क्रोडाः शार्दूलाव्याघ्राः कदंगरीयाआरण्य

उपेयिवान्वर्त्मनिरंकुराजैः सनैमिषारण्यमनेकपानाम् ॥ व्रजन्व्रजैर्धैर्यधरः परीतंवराहशार्दूलकदंगरीयैः ॥११॥
तत्रागतेभ्यस्त्रिदशाहितेभ्यः प्राप्तोमहाध्यानमुदस्यभीतिम् ॥ परिश्रमंसत्रनविश्रुताध्वाविवेदनंभावुरगादथा
स्तम् ॥१२॥
प्रत्रावस्त्रतैः कदंगरंबुसमर्हंतीति कदंगराच्छइतिछप्रत्ययस्तस्येयादेशाः वराहशार्दूलकपोतके
श्चेतिप्राचेकपोताः पक्षिमात्राणिकपोतः पक्षिमात्रेऽपीतित्रिकांडशेषः तैः परीतंव्याप्तम् नैमिषारण्यंएत
न्नामकंवनम् व्रजन्मार्गेगच्छन् धैर्यधरोधैर्ययुक्तः सन् वर्त्मनिमार्गेउपेयिवान् उपायाप्राप्तेत्यर्थः उपेयि
वाननाश्वाननूचानश्चेतिक्वसुप्रत्ययांतोनिपातः ॥११॥ तत्रेतितत्रनैमिषारण्येआगतेभ्यः अकांडप्राप्तेभ्यः

त्रिदशानामहिता असुरास्तेभ्यः भीतिं भयं प्राप्तः अत एव महाध्वानं राजमार्गं उद्दिश्यातीव सूक्ष्मात्व्रजन्निति
शेषः अतः परिभ्रमन्मार्गज्ञानाभावादितस्ततः परिभ्रमणं कुर्वन् विश्रुतो भ्रष्टोऽध्वा मार्गो यस्मा अत एव
तत्र वने पुनरिति शेषः तं मार्गं न विवेद नाज्ञासीत् अथैवं भ्रमणे प्रवर्त्तमाने भानुश्चैतन्मध्ये सूर्यश्चास्तं प
श्चिमाचलं अस्ताचलमित्यर्थः आस्तं क्षिप्तेष्ववसिते त्रिषु नापश्चिमाचले इति मेदिनी अनेकार्थसंग्रहेतु
अस्तः क्षिप्ते पश्चिमाद्राविसाहहेमचंद्रः अब्धिनिमज्जनं वा अगात् प्राप ॥१४॥ अलंभितेति नलंभितः प्रा

अलंभितयामउदारबुद्धिः न्यायांधकारावरणं निरीक्ष्य ॥ क्षुत्तृड्व्यथायामपि धीरचेताः सतत्र तस्थौ व
नितासमेतः ॥१२॥ सोग्रामोयेन उदाराबुद्धिर्यस्य क्षुच्चतृट्तृता भ्यांमथ्यातस्यां ॥ अपि धीरं धैर्यतायुक्त
चेतोंतः करणं यस्य वनितयास्त्रियोध्ययासमेतो युक्तः सधर्मदेवः ॥ अंधकारेणावरणं आहृतिः क्षपयाक्षया
यांवा अंधकारावरणं तन्निरीक्ष्य तत्र वने ॥ एकत्रैतिशेषः ॥ तस्थौ निवासं चकार क्षपांधकारावरणं पश्चा
पाक् इतिपाठे ॥ प्राक् पूर्वम् क्षपांधकारावरणं पश्चाद्दृष्ट्वा तत्र तस्थावित्यन्वययोजना ॥ पश्चाद्दृष्टं प्रथमम
पमितिधरणिः दृग्नोर्दर्शनार्थं त्वेमेदिनीयथाहृकृत्स्त्रियां दृग्नेनेत्रे च बुद्धे च त्रिषु वीक्ष्यकइति ॥१२॥ ॥४॥

सइतिधर्मदेवः तत्र वने धृतो वल्कलवेषो ब्रह्मचारिवेषो येन तं जटाधरं जटानां लग्नकचानामिव परितः कृत्रि
मकचवेष्टनायाः --- वमर्थविधानाभावेस्खलतिमृतस्ततस्सभवानस्मात् अन्तर्गतं न्यगोतिरहितं त्रिरसिखल
तिं इंद्रुस्नाकारं खल्वाटता मित्यर्थः खलतिश्चेंद्रलुप्तकस्समरः ताश्चापिद्धानं धरं तं कुमिसे संभूतो ध्वनिर्यासा
ताश्रुता भं भ्रमरस्यामक्षिकाश्चमक्षिका भ्रमराली स्यादितिहारावलीतपस्विनं तपस्विवेषं रौद्रतनुं देहो यस्य तमत
एव भीमं भयंकरं तं कंचित्पुरुषमिति शेषः ददर्शापश्यत् ॥१४॥ मलेति ततोतिरीक्षणमंतरं प्रवृत्तात्तःवृत्तांतवि

सतत्र भीमं धृतवल्कलवेषं जटाधरं कुंध्वनिभं भ्रमराली ॥ शिरस्यवृत्तं तं स्खलतिं दधानं तपस्विनं रौद्रतनुं ददर्श ॥१४॥
मलात्ततः सिद्ध इतिप्रवृत्तात्तस्तमुक्तकाकारमपेतपंकः ॥ न नाम भिन्नो जनसंचयाभं ज्वलन्महेंगालवितानमत्रेम्

१५ ॥ सः अपेतोगतः पंकापापं यस्य पंकः कर्द्दमपापयोरितिविश्वमेदिन्यौ सधर्मदेवः नुक्तः प्रगल्भ आकरो
यस्य तम् भिन्नो भेदंगतो योंजनसंचयः कज्जलसमूहस्तस्येवाभायस्य तम् अंजनं कज्जले पीतकमितिविश्वः अंजनं
पन्नोरसांजने इत्यादि सनेकार्थसंग्रहे हैमः ज्वलंतावतिप्रवृत्तलेतौ महांतौ इंगालौ रक्तादिरांगारकाविव विशेषेणता
म्रे रक्तवर्णे नेत्रे यस्य तम् विते नुरिंगाल मिवायत्नाः परे इति नैषधीयश्लोकव्याख्याने इंगालो भाषान्तरात् इतिनारा

णः तत्पुरुषम् सिद्ध इति मत्वा सिद्ध इति निपातेनाभिहिते कर्मणि प्रथमा निपातेनाभिहिते कर्मणि न कर्मणि विभक्ति
रिति वामनोक्तेः ननाम ॥ १५ ॥ पृष्ट इति भो पुरुष क इह कांतारे ऽस्मिन्वने तत्रापि सांद्रनिशि अतिक्षोभप्रदायां रात्रौ तत्रापि
स्त्रियासार्द्धं सह भ्रमन् अत एव द्वितीयाश्रमिणां गृहस्थानां वर्त्मनि नृपसंचरणं स्त्रियो मार्गस्तेन हीनः तथापि मात्स
र्येण मत्सरभावेन विवर्जितो रहितः आत्मा मनो यस्य स त्वं कः कोसि इति तेन पृष्टः स धर्मः तं प्राह उवाच ॥ १६ ॥ धर्मेति

पृष्टः स कांतार इति इह सार्द्धं कस्त्वं स्त्रिया सांद्रनिशि भ्रमन्भो ॥ तेन द्वितीयाश्रमवर्त्महीनस्तमाह मात्सर्यविवर्जितात्मा ॥ १६
धर्माभिधः कोसलदेशवासी महीसुरो वैरिभयार्त्तचेताः ॥ वृंदावनेत्रामेविनात्रानायकृष्णः समाराधि ममाध्वरेण ॥ १७
प्रसेदुषः प्राप्य वरानभीष्टानुदारहर्षो वसतिं स्वकीयाम् ॥ तस्माद्यत्रोपार्जिहरान्मुनींद्र व्रजंश्च्युतो ध्यायभयविक्लवो ऽस्मि
१८ ॥ धर्म इत्यभिधानाम यस्य कोसलदेशे वासो निवासो ऽस्यास्येति महीसुरो जातः सा ब्राह्मणः वैरिभ्यो ऽरिभ्यो भयं तेना
र्त्तमातुरं चेतो ऽतः करणं यस्य तेन मया धर्मदेवाख्येनात्र आमेणां दुःखानां विनात्रानं निरत्रानं तस्मै महादुःखविना
त्राप्येस्वर्थः वृंदावने भगवतः कृष्णस्याखंडनिवासस्थाने वृंदावनाख्ये कानने अध्वरेण महोत्सवारसंभृतविद्युया
गादिना कृष्णः श्रीवासुदेवः समाराधि आराधितो ऽभूत् ॥ १७ ॥ प्रसेदुष इति प्रससादेति प्रसेदिवांस्तस्य अत्रोषाणां ॥५॥

तनाम्नार्तिः पीडा तस्या हरस्तस्मात् आर्त्तिः पीडा धनुः कोटो रिस्मरः उपसर्गो हृती ति हृद्यावार्त्तिरपि तस्मात् श्री
कृष्णात् अभीष्टानीप्सितान् वरात् वरणीयार्थान् प्राप्य अधिगम्य उदारो महान् हर्षो यस्य तथोक्तः सन् उदारो दातृम
हतोरिस्मरः हे मुनींद्र स्वकीयां वसतिं स्याद्वसथानं निवासायां सदने ऽपि चेसनेकार्थसंग्रहे हेमः व्रजन् च्युतो भ्रष्टो
ध्यतिलंघितो ऽध्यायेन अत एव भयेन विक्लवः आकुलो ऽस्मि ॥ १८ ॥ तद्दास्यमिति अध्यासाक्षात् तद्दास्यं श्रीकृष्णदास
भावं समुपागतस्य प्राप्तस्य तवेक्षणं दर्शनं तेन प्राप्ता महती मुद्धर्षो येन तस्य तस्य श्रीकृष्णस्य वाक्यं विश्रंभेण विश्वा

तद्दास्यमद्य समुपागतस्य त्वदीक्षणप्राप्तमहामुदो मे ॥ तद्वाक्यविश्रंभयुतांतरस्य भीमे कुरु त्वं विपिने सहायम्
१९ ॥ तदीयनामश्रुतिमात्रजातक्रोधानलप्लुष्टकलेवरेण ॥ तेनानुयुक्तो वदमेतदाप्तान्वरानिति प्राह तमुग्रहर्षि
म् ॥ २० ॥ सेन युतमंतरं चेतो यस्य तस्य मे भीमे भयानके विपिने वने त्वं सहायं मा ऽपि दर्शनरूपं सहायकृत्यम् कुरु ॥ १९
तदीयेति तदीयनाम्नः श्रीकृष्णाभिधानस्य श्रुतिमात्रेणैव जातेन क्रोधानलेन कोपाग्निना प्लुष्टं दग्धं कलेवरं देहो
यस्य तेन तेन मुनिना तदाप्तान् श्रीकृष्णादधिगतान् वरान् मे मह्यम् त्वं वद कथय इति अनुयुक्तः प्रेरितः सन् ॥ प्र
श्नो ऽनुयोगः पृच्छा चेस्मरः स धर्मदेव इति तं ऋषिः उग्रा भीसुसादिका हर्षिर्यस्य तम् तं पुरुषं प्राह ही पोचत ॥ २० ॥

उपेयुषइति मेमम अक्षिपथं नेत्रविषयं उपेयुषे उपागताय तस्मै हे इभमायमयाधर्मेण मदीयं मामकं सर्वमन्न
त्रार्मकः स्वर्ई रितिप्रोक्तं तदास रूस्मः मामां इत्थम मुनाप्रकारेण आहोक्तवान् किंतदित्यपेक्षायामाह हे धर्म भवतो
निकारः परिभवस्तत्राभिरतास्तत्पराः निकारः स्मास्त रिभवेधाम्नस्यो क्षेपणेः पिचेतिमेदिनी असुराः भुविधस्त्रियां वि
नाशं विनिष्ठियास्यं तिइति ॥२१॥ तिष्येति तिष्यः कलिरुपमानं यस्य तस्य तिष्यावतारस्ये तिपाठे कलियुगावतारस्येस

उपेयुषे मे क्षिपथं मदीयं सर्वे रितं सर्वमन्त्रार्मतस्मै ॥ समाहयास्त्यं सुरा विनाशं भवन्निकाराभिरता भुवीत्थं ॥२१॥ नि
ष्योपमानस्य सुयोधनस्य पक्षस्थितायेसहृकोदरेण ॥ मयायुगयातिषतार्जुनेनते भारते संयतिपूर्वदेवाः ॥२२॥ रामे
णके चिन्निधनं प्रणीतायेवैरनिर्बंधयुजः समीयुः ॥ मया मदीक्षादिभिरेस्मसुक्तिं योगं मदीयं दुरितान्निहारं ॥२३॥ र्थः

सुयोधनस्य कलियुगावतारत्वं महाभारतादवगंतव्यम् सुयोधनस्य दुर्योधनस्य पक्षस्थिताः सहायाः येसंति इति शे
षः पूर्वे चैते देवाः पूर्वदेवा असुराः पूर्वापरप्रथमेत्यादिना समासः यद्वा पूर्वं देवाइति विग्रहः ते हि पूर्वं देवाः संतोऽपिन्न
मायादेवत्वाद्भ्रष्टाः स्कस्कवेतिसमासः पूर्वदेवा येभ्य इति वा अनेकमन्यपदार्थे इति बहुव्रीहिः सहृकोदरेण भीमे
नसहितेन अर्जुनेन भारते संयति भारताख्ये संग्रामे मया अघातिषत हननं कारिता ॥२३॥ रामेणेति ये केचित् वैर ॥६॥

स्य निर्बंधेनाग्रहेण युजंत इति तथोक्ताः संतः भारतेतरत्र समीयुः संगताः अभवन्निति शेषः तेच मया रामेण बलभ
द्ररूपेण निधनं मरणं प्रणीताः प्रापिताः रुक्मिणीहरणादाविति शेषः तत्र मम ईक्षा दर्शनं साक्षात्कारः येषां मन्त्रदीक्षा
दिः दुरितानां पापानामार्तिः पीडा तस्या हारं हारकं मदीयं योगं रास समुक्तिं समीयुः प्राप्ताः एतदर्थविस्तरः श्रीमद्भाग
वतमहाभारतसत्संप्रदायविजयाद्विनहरिदिग्विजयादिभ्यो ज्ञेयः ॥२३॥ लब्ध्वेति यैः सुरैः कृतंतां दुष्टो निसर्गः स्वभावो येषां त
दुर्निसर्गा इत्यत्र विशेषदैत्या इति पाठे विशेषो अस्कः दैत्य असुरभावो येषामिति समासः दैत्यत्वद्वेषावप्रधानो निर्देशः वि

लब्ध्वा तनुर्वैरजिघृक्षया तेज्ञात्वा भवंतं च सतो मदीयान् ॥ दुराशया संततमर्दयंति स्कदुर्निसर्गा विषयप्रसक्ताः ॥२४॥
तदीयवंश्यास्तमयं विधास्ये समीरपित्वेति च वो मनोज्ञ ॥ तिरोदधे ते नततः स्वगेहं स्वदीक्षणं मेव्रजतोभिज्ञाते ॥२५॥

शेषो वयं चेत्सक्ता विसुसत्सलमाला अत एव दुष्ट आशयो अभिप्रायो हिंसादिरूपो येषां पतो विषयेषु प्रसक्ता अ
सक्ताः अतः तनुर्लब्ध्वा मनुष्येष्वाविर्भूयेसर्थः संप्राप्य ज्ञात्वा वैरजिघृक्षये तिपाठे जात्म मभी सर्थः जातजन्म निज्ञनेदे
हे इतिरत्नकोशः भवंतं सतः साधून् मदीयान् ज्ञात्वा वैरजिघृक्षया वैरग्रहणेच्छया मदीयान्वो अर्दयंति पीडयंति ॥२४
तदीयेति तदीयवंश्या आसुरी यो यो वंश्यास्तस्यास्तमयं विनाशं विधास्ये करिष्यामि इति मनोज्ञं सुंदरं वचो वचनं समी

रथित्वोक्त्वा तेनरूपेण तिरोदधे ऽंतर्हितम् ततो ऽनंतरम् स्वगेहं स्वगृहं प्रति व्रजतो गच्छतः त्वदीक्षणं मे जरठस्य
जातमिति पाठे व्रजतः इत्यध्याहार्यमुत्तरवदिति स्वविशेषणं मार्गदर्शनरूपतत्कारणपोसादनार्थमुत्तरतः कथितं
जीर्णइति चैजयन्ती मे मम त्वदीक्षणं तपस्विनस्तव दर्शनं आमितः सम्यग्जातं सन्मंगलायास्त्विति भावः ॥ ३५ ॥ प्र
कर्षमिति तेन धर्मदेवेन उक्तं वर्णितं वसुदेवसूनोः कृष्णस्य प्रकर्षमुत्कर्षं स्वस्य पक्षपातः साहाय्यं येषां ते च ते ऽम
रवैरिणो दानवास्तेषां कृततरामसंतं अपकर्षं निकृष्टतां तिरामस्य श्रुत्वा क्रोध एवानलो ऽग्निस्तस्य शिखाभिर्ज्वालाभिः

प्रकर्षमुक्तं वसुदेवसूनोः स्वपक्षपालामरवैरिणां सः ॥ तेनापकर्षं कृततरां निशम्य क्रोधानलानल्पशिखाभितप्तः
३६ ॥ तं मन्युरक्तीकृतलोचनाभ्यां दहन्निवार्यं कुलपांसनोयः ॥ पश्यन्विदष्टाधरदंतवासा ससर्ज सिंधून्स्व सर्वलोकं
३७ ॥ अभितो तप्तः संततगात्रः सन् तुर्ये चरणे ऽत्यक्षरे वह्निकोप इति पाठे कृष्णोत्कृष्टिं प्राप्य उपवासोदरवह्निना उपवा
सपदी प्रज्ञातराग्निना संहंकोयो यस्य स तथोक्तः वहुधु उपवासादिपुण्यकर्मिसमरश्लोकचरणव्याख्याने उपवा
सकृतादिर्यस्ये तिमदेश्वरउपवासग्रहे पुंस्त्वमाहउपवासं गृह्णंदेहं सो हपटहमिस्य पीतिवं दुर्गोमुक्तेः कृचिन्नपुंस
कसमयि वोधम् उवाचेति अग्निमश्लोकगतेनान्वयः ॥ ३६ ॥ तमिति कुलपांसनः कुलदोषः कुत्सा धमइत्यर्थः ॥ ७ ॥

कुलपांसनः कुलदूषणइति दत्रामस्य प्रथमे श्रीधरेणव्याख्यातम् यद्वा कुलपांशुः कुलेपापरूपः पांसुः पापम
स्यस्येति अमरस्थपांसुलान्नात्युद्व्याख्याकृध्यायामुक्तत्वात् पक्षातालव्यास्वान्तं प्रविदंसाः स्युः त्रांवगर्भक
रपांत्राव इतिवचनात् कुलं पंसयति नाशयतिइति कुलपांशुरन्वयुनानुनः पृश्निनात्राने अर्जितत्रिकर्मातिसाधु
रिति धूलिवाचकपांशुत्वनाह्व्याख्याने ऽमरे उग्रो ऽसुग्राकृतिः सर्वलोकं विश्वजनमुजिघ्रसन् हंतुमिच्छुः स्वयंभ्र
सुरिवस्थितः मन्युनाक्रोधेन रक्ती दमता आर्यस्य कलगुणास्पदत्वाद सुत्तमम् तं धर्मदेवम् दहन्निव धक्ष्यति

दृप्यमस्य सूनुत्वमुपेष्यतस्ते जानेपश्यातस्यगुणांश्च दोषान् ॥ तेजस्सुलक्ष्मादितदूषणस्य तथा न जानातिजनो ऽस्मदन्यः
३८ ॥ यः पार्थसारथ्यमुपेत्य चक्रे दुर्योधनस्याप्रियमसमर्थी ॥ मस्तेपसोत्रार्थं दद्दौ कृतो मेतदीयमित्रस्य महापमानः ॥ ३९
किंपनुपम् विशेषेण दष्टो ऽधरो येन तथाविधः सन् इति वक्ष्यमाणप्रकारेणोवाच ॥ ३७ ॥ कृष्णस्येति तेतव कृष्णस्य पुत्र
भावं त्वं प्राप्स्यतः प्राप्स्यतः छलैः शाठ्यादिता निविषणानि येन तस्य छलं स्वलितत्वाग्नयोरिति मेदिनी तस्य कृष्णस्य गु
णान् दोषान् तेजश्च अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् प्राणास्यये ऽप्यसहनं तत्तेजः समुदाहृतमिति भरतः
यथा अहं जानामि तथा मदन्यो मत्त इतरः जनः न जानाति मम तद्गुणागुणानामनुभूतत्वादिति भावः ॥ ३८ ॥ यद्दति आ

समर्थो महत्क्रोधः कोपः क्रोधामर्षरोषप्रतिघास्तु रुड्क्रुधौ स्त्रियामित्यमरः यः हर्षः मत्सेयस्तोमपातिप्रियस्य दु
र्योधनस्य अप्रियमनिष्टं पार्थस्यार्जुनस्य सारथ्यं सारथिकर्म कर्तृत्वं उपेत्य चक्रे सपत्नसमक्षत्वादिदं तदसह्य
मिति भावः अत्रार्थे दुःखं च ददौ दत्तवान् तदीयमित्रस्य दुर्योधनेकस्य दुःखमेऽपि महापमानो महागर्वज्ञाच हतो नि
ष्पादितः ॥ २५ ॥ मन्मित्रेति तदीयः श्रीकृष्णसंबंधी अरिः शत्रुः द्रोणिर्द्रोणाचार्यसुतो हम्मृत्युत्थामा मम मित्रं मि
त्रभूताय वैरैतेयादैत्यास्तेषां सुरवायक्रत्वार्थं ते तुभ्यं हर्षप्रसादक धर्माय शापं ददामि ते सुतः पुत्रः खड्गं निहि

मन्मित्रदैतेयसुखाय शापं ददामि ते द्रोणिररिस्तदीयः ॥ खड्गं न धत्तां बिभृयात्स रेभ्यो यदा सुतो यातु पराभवं ते ।
२६ ॥ हेतिं विना बुद्धिबलेन शत्रून् कथं स जेतुं भविता समर्थः ॥ आतर्दधे वाच मिती रयित्वा समस्तु तस्ताव्यत द्विषा
दौ ॥ २९ ॥ शत्रुं खड्गमित्युपलक्षणं शस्त्रमात्रस्य सर्कंमित्रं जीवनेतथोक्तेः खड्गो गंडकशृंगेस्यात्रिंशो गंडके ऽपीति
शाश्वतरंगिणीन धत्तां न दधातु यदा मच्छापसुदंष्ट्र बिभृयाद्वे तर्हि धतेप्यायुधे परेभ्यः शत्रुभ्यः पराभवं पराजयं
पातु इति शापं ददामीत्यन्वयः ॥ २७ ॥ आयुधधारणनिषेधशापेहेतुमाह हेतिमिति हेतिमायुधं विना बुद्धिबले
न केवलया व्यावहारिकबुद्धिसामर्थ्येन विना नार्थं च संदेहे हेरणाहारणाच्चतेता ना संदेह हरणा ऽव्यवहारं इतिस्म ॥८॥

तदिति कासायनः सः शत्रून् जेतुं कथं समर्थो भविता इति वाचमीरयित्वा सत पस्य मुख्या स्थामा अंतर्दधे मन्मि
त्राणां महानुपकारो जात इति मत्वा ंतर्हितवान् अथ तद्विषादेतच्छापश्रवणात्स खेदौ तौ दंपती भक्तिधर्मौ प
रस्परं ऊचतुः ॥ २१ ॥ पद्म च तुस्तत्स्मष्टयति सिद्धइति हे अंगने कार्ये सिद्धे जातेऽपि प्रतिकूलदैवाद्विपरीतदिष्टाद
पं विघ्नः उपागतोस्ति तत्स्मृत्यामायत द्विघ्नशांस्तथं हरेर्विभूतिः अखिलानां विघ्नानां हारी हरणशीलः सकल
विघ्नहर्त्रेत्यर्थः विनायको विघ्नविनायकः भाविर्भवपुत्रो गणपतिरित्यर्थः आराधनीयस्तदाराधनं कर्तुमुद्यु

सिद्धेऽपि कार्ये प्रतिकूलदैवादुपागतो ऽस्मास्तु हरेर्विभूतिः ॥ आराधनीयो ऽखिलविघ्नहारी विनायकस्तत्स्मृत्यामायभा
विः ॥ २३ ॥ सौमित्रिणा क्षोणिजयाथ सार्द्धं रामेण याता मरुत्स्वप्रवृत्तिः ॥ वने निवृत्तं हनुमन्महिम्नाजगादतच्छोक
निवृत्तये सः ॥ २२ ॥ रूत्यमित्यर्थः विघ्नविनाशनेवकुधानस्य सिद्धेर्विद्यमानस्वादित्यर्थः २३ सौमित्रिणेति अथ
मर्देवः अथ गणपतिव्रतकरणनिर्द्धारानंतरं तस्याः स्त्रियोपः शोकं औदासीन्यं तस्य निवृत्तये विनाशाय सौमि
त्रिणा लक्ष्मणेन क्षोणिजया सीतया च सार्द्धं सह वने रामेण श्रीरघुनाथेन याता प्राप्ता अमरुत्स्वसङ्घः स्वस्य प्रवृत्तिं प्र
वृत्तिं हनुमतो मारुतेः महिमा प्रताप स्तेन निवृत्तां निवर्त्तितां जगाद हनुमता तद्दुःखं नाशितमित्युवाचेत्यर्थः ॥ २२ ॥

हरिसं·
॥ ९ ॥ तयेति अथ धर्ममुखाद्धनुमत्स्तत्पश्रवणानंतरं त्वात्रूणं मदस्यापहर्त्ता नात्राकः कुलस्य स्वकुलस्येष्टदेवः स
हनुमान् अत्र वने स्मृतः हे हनुमन् त्वं रक्ष रक्षेत्यमुना प्रकारेण यदा प्रार्थितः याचितः तदैव धृतं विप्रस्य रूपं
येन तथोक्तः सन् ताभ्यां भक्तिधर्माभ्यां निजेक्षां स्वदर्शनं ददिवान् ददौ ॥ २४ ॥ अथ तदुक्तिं युग्मेनाह जगदिति हे ध
र्म ते तव हे ब्रह्मरूपः सोहं सब्रह्म मोक्षे श्रिसेकाक्षरः कृतस्त्वं तूर्जः तदीयत्रापादस्थ स्वाम्नः त्रपात् अत्रास्म

तयास्मृतोथात्र कुलेष्टदेवः सम्प्रार्थितः त्वां हनुमदापहर्त्ता ॥ त्वं रक्ष रक्षेति तदा निजेक्षां ददिवान् ताभ्यां धृतविप्ररूपः ॥
२४ ॥ जगज्जिगीषेता पितदीयत्रापादत्राम्न भन्तो भविता कृतोहं ॥ त्वदीयवंशावनरूत समीपं स्मृतस्तवैष्यामि चिरं
विपत्सु ॥ २५ ॥ उक्तेति वाणीममृतोपमानां तस्मिन् गते पूर्ववदाप्त हर्षो ॥ उपेयतुर्ग्राममकिंचिद्रात्रौ ततो सार्द्धमासेन
हरिं स्मरंतौ ॥ २६ ॥
तत्त्रास्त्र धारणरहितोऽपि जगज्जिगीषेता जगत्त्रयजेतृ भविता भविष्यति न त्वायं त्वदीयः सत्वासोवं
त्रोः त्वायस्त्वस्यावनं रक्षणं करोतीति तथोक्तः अहं स्मृतः सन् विपत्सु आपत्सु अचिरं तत्क्षणमेव तव समय
त्राप्यामि प्राप्स्यामि ॥ २५ ॥ उक्तेति इति पूर्वोक्तप्रकारां अमृतमुपमानं यस्यास्तां वाणीं उक्त्वा तस्मिन् हनुमति गते
सति पूर्ववद्यथा पूर्वं आप्तोऽधिगतो हर्षो याभ्यां तौ हरिं स्मरंतौ अनिंद्यं दोषरहितं त्रासं स्वभावो ययोस्तौ तौ भक्ति ॥ ९ ॥ सर्ग· ६

धर्मौ सार्द्धमासेन ग्रामं स्वकीयं संवसथं समीपं संवसथ ग्रामावि समरः उपेयतुर्जग्मतुः ॥ २६ ॥ तदीयेति तदीयेति ॥
तदीया भक्तिधर्मसंबंधिनो ये सबंधिजनाः कुटुंबिनः तयोर्भक्तिधर्मयोरीक्षा वलोकनं तेन प्रपन्न संप्राप्तः मोद
आनंदो हर्षो वा येस्ते तथोक्ताः संतः तौ आसमंताद्धिगम्य परिवव्रुः वेष्टयांचक्रुः परितः आह सकुत्राणप्रस्ताम
च्छरिसर्थः कथमिव स्फुटगंधो ये षां ते स्फुगं धास्तैः कृमनसां पुष्पाणां भराः कृमूहास्तैः युते युक्ते तरूणां वृक्षाणां

तदीयसंबंधिजनास्तदीक्षाप्रयन्नमोदाः परिवव्रुरेतौ ॥ युतेसुगंधैः सुमनोभरैस्तौ तरू व्रततसाविव चंचरीकाः ॥ २७ ॥
निरीक्ष्य तल्लब्धमहाप्रतापं तं दुःप्रधर्षं प्रतिकूलतां वं ॥ मित्रात्मितिहित्विगतेरुदर्पो विभुर्द्धिषंतः कलिदुष्टसत्वाः ॥ २८
समुद्दिधिर्युर्जननत्वां जगसांहरिः स्वयं सर्वविदीश्वरेणा ॥ सचिंतनध्वस्तसमस्तदोषैस्सांतैवसत्त्वसदयापयोधिः ॥ २९

वृतसौ स्वस्तेव द्वीतु व्रततिर्लतेसमरः चंचरीकाः भृंगाः इव भ्रमरो मधुहृद् भृंगश्चंचरीकः त्रिप्वीमुखवदतिहैमः अत्र पू
र्णोपमालंकारः ॥ २७ ॥ निरीक्ष्येति तल्लदालब्धः महाप्रतापो येन यस्तात्स्मादुरेलेब्धः महाप्रतापो येन तं दुःप्रधर्षं
अप्रधृष्यं तं धर्मदेवं निरीक्ष्य दुष्टं सत्वं स्वभावो येषां ते द्विषंतः विभुः भयं प्रापुः प्रतिकूलं वत्सली लं च तत्तु हित्वास
त्कागतरु र्महान्दर्पो येषां ते तथाविधः संतः मित्राणी वस्व सरवाय इव अभूवन्निति निरोषः ॥ २८ ॥ समिति जगसांह्

 मोत्तनतां जनसमूहान् समुद्दिधीर्षुरुद्धर्तुमिच्छुः सर्ववित्सर्वांतर्यामित्वात्सर्वज्ञः पतः ईश्वराणां ब्रह्मादीनामपी 
 न्राः तथापि दयापयोधिर्दयासिंधुः हरिः स्वस्मात्मनश्चिंतनं ध्यानं तेन ध्वस्ताः समस्तदोषा रागादयो यस्मात्तस्मि
न् तस्य धर्मदेवस्य स्वांते मनसि स्वांतं हृन्मानसं मनः इत्यमरः अवसत् ॥ ३९ ॥ महइति पुरुरधिका संपद्यस्य स धर्मदे
वः स्वमनसि भगवदागमनं इति विशेषः महसां तेजसां विशेषण आधिक्यं तस्मात् धर्मो न्हमारुतमयोऽम्बूखायस्य स
द्द विरोचमानः संक्षोभमानः आसीत् महोभवे कृष्णवत्तेजसोऽश्वेति विश्वः हरेः श्रीकृष्णस्य प्रसादः प्रसन्नता तस्योप

महो विशेषादिव धर्मेरश्मिर्विरोचमानः पुरुषंपद्दंसीत् ॥ हरिप्रसादोपगमेन भूमौ हरिप्रसादाभिधया प्रसिद्धः ॥ ४० ॥
आत्राक्षपेशुं मनसेव पूर्णं जगन्निवासं दधती विरेजे ॥ श्रियानुकुर्वसमलैर्गुणाद्यैः श्रीदेवहूती पुरुषोत्तमसा ॥ ४१

गमः प्राप्तिस्तेन हरिप्रसादप्राप्त्या हरिप्रसादइसेवं भूताया पिधासंज्ञातया प्रसिद्धो विख्यातः आसीत् हरिप्रसा
दाप्त्या हरिप्रसादसंज्ञोऽभूतइत्यर्थः ॥ ४० ॥ अत्रोपमालंकारः हरिप्रसादाभिभवाप्रसिद्धत्वंप्रति हरिप्रसादोपग
मेप्रेतिपदार्थस्य हेतुत्वात्पदार्थहेतुकं काव्यलिंगमलंकारश्चेति आप्नोति पूर्णं सर्वकलाभिः संपूर्णं क्षपेशं चंद्रं
क्षपेशाः क्षपाकर इत्यमरः दधती धनवनी आशा दिशेव प्राची वेति यावत् आशातदपादिशोः स्त्रियामिति मेदि 

नी जगतां निवास आधारस्तं मनसा दधती सा भक्तिः पुरुषोत्तमं कपिलं दधती श्रीदेवहूतिं अमलैः शुभैः गुणाद्यैः
गुणसमूहैः अनुकुर्वती तत्सदृशी इत्यर्थः तथा भूता सती श्रिया स्वांतर्भगवत्सवेश्मा जनित या शोभया विरेजे असं
तशोभमाना भवदित्यर्थः अत्रोपमयोः संसृष्टिः अधिकालंकारः ॥ ४१ ॥ पुरेति स्वकीयं निजं सदनं गृहं महः समू
हेन तेजः पुंजेन विभासयंती प्रकाशयंती तां भक्तिं अवेक्ष्य दृष्ट्वा पुरांगनाः पुरस्त्रियः स्फुविस्मिता अतिविस्मययुक्ताः
संसः गर्भवती सगर्भा नारी एतादृशी एतदाकृतिः तद्दृष्टा नावलोकिता इति प्रोचुः परस्परं कथयंति स्म ॥ ४२ ॥ एतादृ

पुरांगनास्तां सदनं स्वकीयं महःसमूहेन विभासयंती ॥ स्फुविस्मिताः प्रोचुरवेक्ष्य नारी नैतादृशी गर्भवती तिदृष्टा ॥ ४३
एतादृशी भागवते श्रुतास्ति कृष्णप्रसूः सर्वजगन्निवासः ॥ असाः प्रविष्टा जठरे पुराणो हरिर्हि लोकाभ्युदयावतारः
४३ ॥ परस्परं तन्महिमानमित्थं समीरयंस्मः प्रणयार्द्रचित्ता ॥ नितौत्तमांगेषु दधुः प्रमोदात्तदीयपादांबुजसद्रजांसि
४४ ॥
यीति एतादृशी भक्तिसदृशी भागवते श्रीमद्भागवतपुराणे कृष्णप्रसूः श्रीकृष्णमाता देवकी श्रुतास्ति यद्गर्भे भग
वानाविर्भवतीति सेत्थं भूतास्मादिति भावः नतु तुल्याकृतित्वादस्याः जठरे उदरे सर्वाणि जगंति निवसंसास्मिन्निति तथोक्तः पु
राणोऽनादिसिद्धः लोकानामभ्युदयायोदयार्थमवतारः प्रादुर्भावोयस्य स हरिः प्रविष्टः हि निश्चितमेतत् अत्राधिकालंका

र॥४३॥ परस्परमिति इत्थं तस्याभक्तेर्महिमानं परस्परसमयो ऽन्यम् समीरयंस उच्चारयंसः प्रणयेन स्नेहेनाङ्गीणि दुर्वी
भूतानी चित्तानि यासां ताः स्त्रियः प्रणयः प्रसवे प्रेमि याया त्वाविश्रंभयोरपीति मेदिनी प्रमोदाद्धर्षात् तदीयं भक्तिसं
वंधि यसादांबुजं पादपद्मम् तस्य सङ्गं सि ऽम्भ हितरेणून् निजोत्तमांगेषु स्वस्वमूर्द्धसु दधुर्धृतवंतः उत्तमांग
शिरः स्यार्द्धमिस्समरः॥४४॥ आविरिति निवारणं वारणागतजनानां त्रिविधतापहरणेन रक्षकः पंकानां पापानां
मोघाः समूहस्तान्विध्वंसयतीति तथाभूतं नामधेयं यस्य सः पंकः कर्दमपापयोरिति विश्वः ओघो वेगे जलस्य च

आविर्वभूवेति हरिः शरण्यं तस्यां क्ष पूर्णेन्दुरिवोरुकीर्त्तिः॥ प्राचामवद्भिरपवर्जितायां पंकौघविध्वंसननामधेयः
॥४५॥ परमविपुलधामदिव्यरूपं तनुजमवेक्ष्य मनोहरप्रतीकम्॥ मुदमतितरां यिनी प्रसूः प्रपेदे परमितलक्ष्मविलक्षि
तानुभावम्॥४६॥ प्राचेपरंपरायां चेति मेदिनी इति हेतोः स भगवान् हरिर्हरिनाम्ना विख्यातः प्राच्यां पूर्वदिशि उरुर
धिका कीर्तिस्तापहरणरूपं यशो यस्य सः तथोक्तः इदं भगवतो ऽपि विशेषणं पूर्णेन्दुः पूर्णचंद्र इव अवद्भिः दोषैः अ
वद्यपण्येत्यादिना वद्य गर्ह्यार्थे निपातितः अपवर्जितायां रहितायां तस्यां भक्तौ आविर्वभूव सर्वजनमंगला
र्थं प्रकटो बभूव॥४५॥ परमेति परमं श्रेष्ठं विपुलं पृथुलं धाम तेजस्तत्र दिव्यमलौकिकं रूपं आकृतिर्यस्य तम् विपु ॥११॥

लः पृथुलो ऽगाधे रूपं स्वभावे सौंदर्ये नाणौ क पशुशब्दयोः ग्रंथावृत्तौ नाटकादावाकारश्लोकयोरपीति च मेदिनी मनो
हरा रमणीयाः प्रतीकाः शरीरावयवा यस्य तम् परमाणि श्रेष्ठानि निजानि आत्मीयानि लक्ष्माणि परमेश्वरत्वबोधकानि
सामुद्रिकोक्तानि चिह्नानि तैर्विलक्षितो विज्ञापितो ऽनुभावो यस्य तम् तनुजं पुत्रं अवेक्ष्य आलक्ष्य अतितरां यिनी अ
तितरां पतावती अपरिमिया मिसमर्थः मुदं हर्षम् प्रसूः जननी भक्तिः प्रपेदे संप्राप्ता भूत पुष्पिताग्रा वृत्तम् लक्षणं तूक्तं
प्राक्॥४६॥ अवेति हरौ सूर्ये उदिते उदयं प्राप्ते सति नलिनानां कमलानां वनानि इव वत्रान्दृत्वा अर्थ हरौ भगवति वु

अवयथुरतुलं हरौ प्रमोदं नलिनवनान्युदिते वसन्मनांसि॥ जगति तृपकुलद्विषां तदानीं भृशमिव कैरवकाननान्यह
र्षम्॥४७॥ अथ कोसलेषु जननक्षणे हरेर्लोकसन्मधुर्जनमनोरमान् गुणान्॥ जनयन्ति ताः स्तदनु प्रसन्न ये प्रमताः
सिध्ये विषुरिवानुगः पतिम्॥४८॥ दितेसतां मनांसि मानसानि द्रुमोदमानंदम् अवयथुरवापुः जगति पृथिव्याम्
तदानीं हरिप्रादुर्भावक्षणे नृपकुलं धर्मकुलं द्विषंतीति तेषाम् कुलानीति शेषः कैरवाणां कुमुदानां काननानि
इव भृशमत्यंतम् अहर्षं हर्षाभावं संचकोचमिति यावत् अवयथु अत्रापि पुष्पिताग्रा वृत्तम् अलंकारस्तूपमैव॥४७
अथ श्रीहरेर्जन्मक्षणं वर्णयिष्यं स्तात्कालिकान् शुभसूचककालादीननुवर्णयति अथेति अथमंगले मंगला

नंतरारंभप्रश्नकार्के्लेषयोरर्थेसमरः हरेः श्रीपुरुषोत्तमस्य जननस्यजन्मनः क्षणोऽवसरस्तस्मिन् । जनु
र्जननजन्मानिजनिरुसत्तिरुद्भवइसमरः क्षणः कालविशेषेस्यात्सर्वएपवसरेगृहेइसनेकार्थसंग्रहेहैमः
कोसलेषुसाकेतविषये मधुर्वसंतः मधुपुष्परसे क्षौद्रे मद्येनातुमधुद्रुमेः । वसंतदैत्यभिच्चैत्रेइतिमेदिनी । जनम
नोरमान् सकललोकमनोहरान् । निजानात्मीयान् निजमात्मीयवृद्धयोरितिविश्वः गुणान् नानाविधकुसुम
प्रादुर्भावादीन् जनयत्प्रादुर्भावयन्नत्रवृक्षादिविनिर्विशेषः हेतुमएपंतात्प्रादुर्भावार्थाज्ञानातेर्लटः शत्रादेशः
पतिस्वस्वामिनम् सिषेविषुः सेवितुमिच्छन् प्रकृष्टमनोयस्यसप्रमनाहर्षमाणः हर्षमाणोविकुर्वाणः प्रमना
हृष्टमानसइसमरः । अनुगोऽनुचरश्च अनुवृत्तीवीसहायःस्यात्सेवकोऽनुचरोऽनुगइतिहलायुधः । तस्यश्रीह
रेरनुग्रहस्याप्रसत्तिःप्रसन्नतातस्यैविकीर्णतापासंप्राप्तोप्रसत्तिर्गमनेऽपि च । प्रसन्नतायामितिराजदेवः
प्रपूर्वात् । सीदतेः क्तिन् अकसह्विकाद्वांसंप्राप्तवान् । यद्यपिमाघशुक्लपंचमीमारभ्यवसंतर्तुप्रवृत्तिर्जग
त्प्रसिद्धास्तितथापिमासारयोः सान्तरएवसंतइतिसौतिषिकसमयान्मीनस्यचविशेषतश्चैत्रएवसंभ
वादत्रचैत्रेत द्विकसनोक्तिर्नदोषावहा । अलंकारस्तूपमैव तथाचवाऽभट्टः उपमानेनसादृश्यमुपमेयस्यय
त्रसाप्रसयाअयतुल्यार्थसमासैरुपमामतेतिस्कमंगलावृत्तम् सजसाजगौभवतिसासुमंगलेतितल्लक्षणात् ४८



अतीति असत्तिप्रायेनसारोवरोऽतिसारः सारोबलेमज्जनिचस्थिरांशेन्याय्येचनीरेचधनेचसारम् वरेऽन्यव
त्सारसुदारहरंतीतिविश्वः सचासौसौरभः सुगंधस्तस्यविलोभोऽग्रहणगृध्नुतातस्मिंश्चंचलालोलायेभ्रमरा
स्तेषामारवाः शब्दायेषुतेयेप्रसवाः पुष्पाणितेषांभारोवीविधस्तेनभंगुराभंजनशीलाः यद्यपिसौरभशब्दः सु
गंधवाचकः कोशेषुनद्दृष्टपंतेतथापितथार्थात्सुरभिशब्दात्स्वार्थिकेऽणिप्रसयेतुसोपितद्वाचकएवबोध्यः
आरवारावसंरावविरावाइसमरः प्रसवस्तुफलेपुष्पेइतिविश्वः भारः स्याद्वीवधेविंशाविंतिमेदिनी विव

अतिसारसौरभविलोभचंचलभ्रमरारवप्रसवभारभंगुराः ॥ परितोवनोपवनतोविरेजिरेविटपिव्रतसइ
वनर्तः ॥४९॥ धोवीवधोभारः पर्याहारस्तुकथ्यतेइतिहलायुधः भंजभासेतिघुरचिभंगुरः विटपिव्रतसौम
हीसहलताः वृक्षोमहीरुहः शाखीविटपीपादपस्तरुरिसमरः वल्लीतुव्रततिर्लताप्रतानिनीततीस्तथेसम
रहलायुधोनर्त्तनोक्तकान्तसाचरणेत्कंविताइव वनोपवनतोवनोपवनयोरित्यर्थः आद्यादित्वात्तसप्रत्य
यात्तसिः परितः सर्वतः विरेजिरेशुशुभिरे अटव्यरण्यंविपिनंगहनंकाननंवनम् आरामःस्यादुपवनंकृ
त्रिमंवनमेवयदितिचामरः परितः सर्वतोविष्वक्समंतात्स्समंतवइतिहैमः उत्प्रेक्षालंकारः कल्पनाका

चिह्नैश्चिह्नाद्युत्तार्थस्पसतोः स्यथा ह्योतितेवादिभिः त्राह्नैरूक्तेक्षासास्मृतापथेतिवाग्भट्टोक्तेः ॥ ४९ ॥ मधुरैरिति ॥
हितकारिणीजगज्जनहिताचरणत्रीलापरैः काकादिभिः भृतापुष्टापरभृताकोकिलामुदाहर्षेणमुहुः पुनः
पुनः स्तुतैरुदात्तभावेनोच्चारितैः मधुरैः श्रोत्रप्रियैः कूजितैः त्राह्नैः परितोव्रजजन्मर्वतोपायीयः पथिकनैर्थिकव्र
जः पांथस्यनैर्थिकस्य वृजनस्य व्रजः समूहस्तम् जन्मनः सत्त्वसमुफलंलाभः इहास्मिन् स्थानेएव भवतिवर्त्त
तेइतीत्थम् आह्वयतीवाकारयतीवलक्ष्यतेइतिगोषः एतेनतस्मिन्क्षणेऽसामंदेनपरभृताश्चपिचुकूजुरिति

मधुरैरिवाह्वयतिकूजितैः स्तुतैर्हितकारिणी परभृतामुहुर्मुदा ॥ परितोव्रजसथिकनैर्थिकव्रजंभवतीतिसत्फ
लमिहैवजन्मनः ॥ ५० ॥ अभवंस्तदाबकुलमंगलस्वना नगरादिकेष्वधिनिशांतमेधत ॥ इहचबक्रयोतलचितांहि
जन्मनाहुतभूतिसंवरणकुंडसंस्थिता ॥ ५१ ॥ ज्ञापितम् अलंकारस्तुपूर्वोक्तएव ॥ ५० ॥ अभवन्नितिइहभूमौ
तदातस्मिन्समयेनगरादिकेषुपुरप्रभृतिषुपतनेस्मादधिष्ठानेनिगमः पुटभेदनम् नगरंनगरीदुर्गः स्थानीयम्
पुरीपुरमितिहलायुधः बकुलमंगलस्वनाः प्रचुरकल्याणनिनादाः मंगलासितदूर्वायामुमायांपुंसिभूमिजे ॥ न
पुंसकेतुकल्याणेइतिमेदिनी अभवन्जायंतेस्म निशांतेइत्यधिनिशांतमर्द्धरात्रेदशघटिकारात्रतीतकाल ॥१२॥

पिनिशांतकालासन्नत्वादेवमुक्तिः विभक्त्यर्थेऽव्ययीभावः अनलचितांहुतास्मिचयनाम् चितवानग्निमग्नि
चिदिसमरः द्विजन्मनांमासद्विजातित्वानांभूदेवानाम् हुतंभूतिसंवरणंभस्मनाच्छादनंयेषांतेचतेकुंडसंस्थि
ताः कुंडमध्यावस्थिताः भूतिर्भसितंभस्मक्षाररक्षाचमिहिश्चेतिहलायुधः बह्नयोऽग्निहोत्राग्रयः एधताति
प्रदीप्ताअभवतिसर्थः एतेनकालस्यशुभत्वंज्ञापितं ॥ ५१ ॥ अभवदिति तदाश्रीहरिप्रादुर्भावसान्वयेअभ्रमं
बरम् द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्करमंबरमित्यमरः असतिशायेनशांतानिर्मलाश्चग्रहाबुधादयस्ताराअ

अभवत्तदाभ्रमतिशांतनिर्मलग्रहतारकंतुहिनरश्मिराजितम् ॥ पवनोववौसुरभिमंदशीतलोबकुनिर्हृतिंसमग
मनृगदादिताः ॥ ५२ ॥ जगतिनृपतिकारागेहसंकीलितायेस्फुटदनिगडकानांतेद्रुतंमेदमापुः ॥ जनइवयुनाप्रा
वापदंदुःसहानांत्रिभुवनततनुभाजः शर्मतज्जन्मकाले ॥ ५३ ॥ श्विसादितारकाश्चयस्मिंनतत् तुहिनाःशीतास्वम्यः
किरणायस्यतेनचंद्रेणराजितंशोभमानम् अभवत् पवनोवायुश्चसुरभिमंदशीतलः सुगंधयुक्तोमंदगामीतुहि
नश्चसनृववौगदादिताः जाताः बकुनिर्हृतिर्हृतिंप्रचुरसुखंसम्सुगमन् ॥ ५३ ॥ जगतीतितज्जन्मकालेश्रीह
रिप्रादुर्भावसमयेजगतिलोकेयेजनाः नृपतीनांराज्ञांकारागेहेबंधनभवनेसंयंत्रिताः संयताः आसन्निति

न्नेष: तेजना: कृतं त्रीघ्रमुक्तहृद निगडकानांगादपाद्ग्रं खलानाम् भेदं विदारणम् त्रिभुवभनानुभाजो भुवनत्र
यनिवासिन: प्राणिन: वयुनासौज्ञानप्राप्तोसत्साम् दु:सहानां दु:खेनाविसोढुमर्हाणामापदां विपदामिव
ईयु: प्रापु: कारास्याद्बंधनालये इत्यमर: बंदेकीलितसंयताविसमर: अंदुको निगडो स्त्रीस्पादित्यमर: श्रृंखलीनि
गडोवुक: हिंजीरदु तिहैम: निगड: पादबंधस्यहिंजीर: श्रृंखलो दुकङ्गतिहलायुध: भेदोहैधे विश्लेषेस्याकुपनापेविदा
रणेइतिविश्व: मायावफनंज्ञानमितिनिघंटु: अत्रोपमयोपमेयस्यापुनर्भाविङ्क्त: इत तारभ्यश्लोकपंचकसमा

तृषगृहमथनाकादेसद्देसद्विषंतोरु चिरफरभिस्नामंजलिष्वादधाना: ॥ क्षितिगतिवदलक्ष्यस्वीयकायाश्च च
क्रु: स्थितिमतिनतिमंत: श्रीहरएक्षोत्कचिन्ता: ॥ ५४ ॥ लिनीहृन्नम् ननमयपपयुतेयेमालिनी भोगिलोकेशितिल
क्षणात् ॥ ५३ ॥ तृषेति अथानंतरम् देसद्विषंतो असुरप्रसवीकादेवा: नाकात्स्वर्गात्स्मात्तृषगृहं देवत्रामोपरस
मुद्रनभवनम् एत्सप्राप्यरुचिराण्पातेस्कंदाणिफरभिस्नानिस्कगंधिकुसुमानिप्रसूनं कुसुमं सुमनसं पुष्पंप्रसू
नं सुमनस: प्रसवस्त्वमरणीकमितिहैम: अंजलिषुसंयुतप्रसृतिद्वयेषु पाणिर्निकुब्ज: प्रसृतिस्तौयुतावंजलि:
युमानित्यमर: आदधानानपादद्दाना: क्षितिगतिवन्मनुष्येस्कल्पम् लक्ष्यानन्तर्कणीया: स्वीयकाया: स्वकीय ॥१४॥

देहायेषांते अतिननतिमंतो संतं नमस्कुर्वाणाश्च श्रीहरेरीक्षादर्शनं तत्रोत्कामुत्सुकानिचित्तानियेषांते तथा
भूता: संत: स्थितिमवस्थानम् चक्रु: ॥ ५४ ॥ अदितीति अदितिसुतानां देवानां समूहा: देवाअदितिनंदना इत्यम
र: संसृतिच्छेदि संसारबंधनच्छेदकं हरिपरमगुणानां भगवतो निष्कारणकारुण्याद्युत्कृष्टगुणानाम् गायनं गान
म् चक्रु: सर्वेसिद्धायोगसिद्धतप: सिद्धज्ञानसिद्धादयो खिलसिद्धा: जयस्वं जयपतेत्येतिध्वनिम् चक्रुरुच्चारयामा
सु: तदानीतस्मिन्समये ऋषिवारामरीच्यादिऋषिवृंदानिवार: सूर्यादिदिवसेद्वारे वसरवृंदयोरितिविश्व: सा

अदितिसुतसमूहा: संसृतिच्छेदि चक्रुर्हरिपरमगुणानां गायनं सर्वसिद्धा: ॥ तयरस्वमृषिवारा: सावित्रीघो: स्तदानी
नन्नृतुरमरयोषा: सादरं प्रीतिभाज: ॥ ५५ ॥ क्षयमुरुमलकोलध्वांतवारानितांतं हृदि विकृतरत्तपंश्च संवित्तिको
का: ॥ समुदितवतिरूपेदौ भक्ष्मकुंडताराह्नचिन्मयसिद्धगणान्त्याद्यानिविग्लानिमीयु: ॥ ५६ ॥ त्रीष: स्तोभनात्री
तीदान् अदुर्ददतिस्मप्रीतिभाजो संतप्रसन्नतायुक्ता: अमरयोषा अप्सरस: सादरं यथातथा नन्नृतु: ॥ ५५
क्षयमिति कृत्स्नेसेश्रीब्रह्मरूपेचं देवदितवतितदयं प्राप्नुवतिसति उरुरधिकोमल: पापंयेषांतेपतेकोला: को
लाध्वसंस्याजनास्तएव ध्वांतमंधकारस्तस्यवारावृंदानिपापेचहृपणोमलइतिविश्व: वार: सूर्यादिवासरेद्वारे

रेकुञ्जरदक्षेद्वंदावसरयोः क्षणोइतिमेदिनी नितांतमसंतम् क्षयंविनाशम् ईयुर्जग्मुः स्थक्क्रमंवित्तयः स्थक्कज्ञानिन
स्तएवकोकाश्चक्रवाकाः चक्रवाकेद्वंके कोकइतिवैजयंती हृदिमानसे वक्रतरतापमतिसंतापम् ईयुः कुंउत्ता
राः कुंराध्वस्य — रूपतारकाः भ्रन्नामतिन्नायेन रुचिलयंस्वस्वकांतिवितानताम् ईयुः त्राणकाज्ञातित्राणकज्ञ
नरूपपद्मानिविल्वानिम्लानताम् ईयुः अत्रसर्वत्रताद्रूप्यरूपकालंरत्नावलौस्फूर्तिरपेक्षत्वान्नत्संसृष्टिः॥५६
विदधुरिति जगतिपृथ्व्यांदुद्वास्मिन्हरिजन्मसमयेजयरवंजयजयेतिनरदेवाद्युद्धितध्वनिम् जैनवाराजैनवृंदा॰

विदधुरिहमभालस्फालनंजैनवाराजपरवमिवार्सिहामेघनादंनिनाम्॥ जगतिदितिसुतांनाश्चग्रदंभाद्युपेता
गुरवइवयवासाः पाशश्रुश्कत्वमीयुः॥५७॥ क्षमामुरव्यः साधारणइतिविप्रोयोद्विविधतांनामाश्रः सनुपाप्तोऽक
सदिहयोऽनन्तुदयः हरेराविर्भावेजनहितकरः कृत्नामनः प्रयातेऽनीतांनागुदयमिवपाथोजनिचयः॥५८॥

नि निनाम्यश्रुत्वामेघनादंपयोदगर्जितम् निनाम्यसिंहाः केसरिणइवकभालस्फालनं कृतवंतःललाटकुट्टनमुविदधुः
छद्मकपटंचदंभोधर्मध्वजित्वंवतावादीयेषांमानादीनांतैरूपेतायुक्ताः दितिसुतांनादैत्यांत्रासंभवाः गुरवः वर्धता
वितिनोपः यवासाद्दवतुः स्वर्गाइवयासोपयासोद्भुः सन्नोधन्वयासः कुनाशकइसमरः पाशश्रुक्कत्वंप्रभूतनीरसभा ॥१५॥

वमुईयुः प्रापुः उपमालंकारः॥५७॥ क्षमेति इहलोकेहरेः श्रीकृष्णस्य आविर्भावेसति अन्नीतांत्रोमूर्ये उदयम् प्र
याते सति पाथोजनिचयोजलजसमूहइव कृत्नामनोजनसंतापहरः वृषोधर्मः योद्दाषद्प्रकारः सन्नपिक्षमा
मुख्यायस्मिन्सः साधारणः सर्वजनपाल्यत्वात्सामान्यः नामआद्योयस्मिंस्तथाविधः विप्रोयोब्राह्मणादिप्रसे
कजनपाल्यः इसमुनाप्रकारेणद्विविधताम् प्राप्तः सन् अकसद्विकाङ्गप्राप्तवान् ननुधर्मषड्विधत्वंसत्संगिती
वनेमषड्विधोवर्णधर्मोधर्मआश्रमाणांतथाधर्मोवर्णाश्रमाणांचगौणोनैमित्तिकस्तथासाधारणइतिप्रो॰
क्तः योदाते षड्विधइति तत्रब्राह्मणोनिसमेवमद्यंवर्जयेत्स्त्रयल्लतइत्यादिर्वर्णधर्मः अग्नींधनभैक्षच
र्यादिराश्रमधर्मः पालाशोदंडोब्राह्मणस्येत्यादिर्वर्णाश्रमधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्यराज्ञःप्रजापा
लनादिर्गुणधर्मः विहिताकरणेनिषिद्धसेवनेनिमित्तंप्रायश्चित्तंनिमित्तधर्मः अहिंसादिः साधारणधर्मइति॰
मिताक्षरायाम्। सत्संगितीवने। क्षमादयानसूयाचन्नोचानायासमंगलम्। अकार्पण्यंनिःस्पृहत्वंधर्मः साधार
णोमतः बाह्येवाध्यात्मिकेदुःखेकेनाप्युत्पादितेसति। नकुप्यतिनवाहंतिसाक्षमापरिकीर्तिता। परोवाबंधु
वर्गोवामित्रंद्वेष्टापिवासदा। आपन्नसर्वथारक्ष्योयदैषापरिकीर्तिता। नगुणान्गुणिनोहंतिस्तौतिमंदगुणा
नपि। नान्यदोषेषुरमतेसानसूयाप्रकीर्तिता। अतक्षपरिहारश्चसंसर्गश्चाप्यनिंदितैः। स्वधर्मेचव्यवस्थानंशौ

चमेतस्य कीर्त्तितम्॥ नारीरंपीडनतेयेन कृत्स्नेनापि कर्मणा। असंतंतन्न कर्तव्यं मनायासः स उच्यते। अक्रोधः
प्राणिमात्रस्य वर्जनं चानृतस्य च॥ प्रशस्ताचरणं नित्यंयत्तन्मंगलमुच्यते। स्तोकादपि प्रदातव्यमदीनेनांतरा
त्मना। अहन्यहनि यत्किंचिद्दकार्पण्यं हि तत्स्मृतम्। यथालब्धेन संतोषः परद्रव्याद्यचिंतनम्। अनासक्ति
स्पृहेत्याद्यैर्निःस्पृहत्वं तदुच्यते इति भगवद्गीतायाम्। शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ज्ञानविज्ञानमा
स्तिक्यं ब्रह्मकर्म स्वभावजम्। शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्व
भावजम्। कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्। परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजमिति। इत्यला

क्षपेऽत्युग्रेऽप्याकान्तात्किल तदवलोकाकुलमनाः समुत्तीर्णः प्रादुर्वियति निगमाः स्वावनमुदम्॥ पुराणानि प्रा
भूदश्च सपदि हरेर्यः खिलजनैर्महोनाद्यैर्भक्तैर्वपुष उरुकोट्यर्कतुलनः॥५७॥ र[illegible]णं श्लोकानां शिख
रिणीवृत्तम्। रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति लक्षणात्। अत्रोपमालंकारः॥५८॥ क्षपेति क्षपे
ऽत्युग्रेऽपि तस्य श्रीहरेरवलोकोदर्शनं तस्मिन्नाकुलं संवेगवन्मनो यस्य स तथोक्तः सन् आकान्तान्नभसः
वियसंतरिक्षे समुत्तीर्णः अवतारतां प्राप्तः किल निगमा वेदाः अथ पुराणानि एतत्सच्छास्त्रमात्रोपलक्षण ॥१६॥

मुस्वावनमुदं स्वरक्षणसंभावनजनितानंदम् प्रापुः सपदि तत्क्षणात् एव भक्तैः वपुषः शरीरात् स्वकान्तात् उरु
कोट्यर्कविक्रुकोटिसूर्यास्तकलनोपमानं यस्य सः अखिलैः सर्वजनैः दुरूपो वीक्षणीयः महोनाद्यैः सोऽप्यतेजः
पुंजः प्रादुर्भूतकांडप्रादुर्बभूव॥५९॥ अभूदिति अथानंतरम् तेन महसा सत्तलधिनगद्रुसमुद्रपर्वतवृक्षसहि
तम् क्षितितलं भूतलम् पूर्णं पूरितम् अभूत् नभोनाकाद्याकान्तास्वर्गादिकम् आच्छादितम् धराद्यावृतिग
णः पृथिव्यादिसप्तावरणसमूहः आच्छन्नः सच्चित्सुखमये सच्चिदानंदरूपे इह अस्मिन्महसि सूर्यादेः सूर्यसोमा

अभूत्तेनापूर्णं सत्तलधिनगद्रु क्षितितलं नभोनाकाद्याच्छादितमथ धराद्यावृतिगणः॥ तिरोभूत् सूर्याद्येर्मह इह
हि सच्चित्सुखमये जनो आपद्य दृश्यं स्वमपि न परं प्रेक्षत इह तत्॥६०॥ विभीता ज्ञानंतो निखिलजगदाकस्मिकलय
द्यमेकत्र स्थाऽरुरस्थित तनुभृतस्ते नगमिता॥ महाश्चर्यं कार्यं ते दितिस्य विदंतो भगवतः स्तुतिं तत्संहर्तुं विदधु
रथ तत्संहृतहन्ना॥६१॥ अग्न्यादिनाम् महस्तेजः तिरोभूदंतर्हितं बभूव हि निश्चितमेव जनो मनुष्यादिलोकः स्वमा
त्मानमपि परमन्यमपि न प्रेक्षत नैव पश्यत् पतिस्म तन्महः तत्रमिति शिष्यः विश्वमखिलमपि सावरणं जगत् आ
पतत् विनिष्पत्तो आप्नोति स्म इहेतिनात्र प्रमाणापेक्षा समाधिभाजां तद्दातथादर्शनादिति भावः॥६०॥ विभीताइ

हरिसं· तिअनेकानिचत्वानिब्रह्मांडानिचतेषुस्थिताश्चतेतनुभृतःप्राणिनश्चतेतेनमहसानिखिलजगदाकस्मिक सर्ग·६
॥१७॥ लयंसकलजगतामकांडप्रलयम् जानंतः अतएवविभीताविशेषतोभीतिंप्राप्ताःमहाश्चर्यमुपगमिताःप्रा
पिताःअथानंतरम् तदेतन्महःकादंर्भक्तंतराधिष्ठितरूपमसंबुधिइत्यमुनाप्रकारेणस्कविदंतःस्तुतरो
जानंतःसंतःतेनसंहृताहृवंयेषांतेतथाभूताश्चसंतःतन्महःसंहर्तुंप्रसाहर्तुम् भगवतोऽनंतेश्चर्यजलनि
धेःपरमेष्ठ्यस्यस्तुतिंस्तोत्रम् स्तवःस्तोत्रंनुतिःस्तुतिरित्यमरःविदधुःविशेषादरतश्चक्रुःहिनिश्चितमेव

स्तुतोवेदैर्देवैर्निजविधिकरैःसर्वहितकृत्सतत्तंमहसाभूदनलइवमूर्त्तोनिजमहः॥पुनर्दृष्ट्वाःस्तुत्वातममति
मुदितावीक्ष्यविनताविदंतोगोलोकस्यपतिमथतस्थुःकिलपुरः॥६३॥
६४॥स्तुतइतिनिजविधिकरैःस्वाज्ञा
कारिभिःदेवैर्ब्रह्मेंद्रादिस्तुपर्वभिःवेदैःकरणैःयद्वावेदैर्मूर्त्तिमद्भिर्निगमैश्चस्तुतोवंदितःसर्वहितकृत्स्वाश्रित
सकलजनहितकारकःसश्रीहरिःतत्तुनिजमहःस्वकीयमतिन्यायिततेजःमहत्सुस्वमूर्त्तौतदुपसंहारंकृत्वा।
स्थितइतिशेषःमूर्त्तोमूर्त्तिमानुइवपःसर्वजनवीक्ष्यःतेजाःप्रदर्शनात्प्रागपद्येतिशेषःअनलोऽग्निरिवअभू
तुस्वमूर्त्तौतन्महस्मउपसंहरणंकृत्वायथापुरमूर्त्तिमानभवदित्यर्थः अथानंतरम् वनिनाःकृतप्रणामाःअ ॥१७॥

तिमुदिताःतम् वीक्ष्यपुनःस्तुत्वातम् गोलोकस्यपतिंगोलोकधामैकनृपम् व्यपतिःकारूभेदेऽपिभूमृक्त्र
मिथरेन्द्रपेइत्यमरःविदंतःसंतःपुरःश्रीहरेःपुरःप्रदेशेतस्थुकिल॥६३॥नृपइति अथोअनंतरम् वृषोधर्मः
भक्तिश्चवृंदावनेकृतानिरीक्षादर्शनमयस्मतम् हृदयम् निरीक्ष्यसम्यगालोक्यवकुमुदम्सानंदम् आपत
उभौभक्तिधर्मौतत्स्तुतिंश्रीहरिस्तवनम् विदधतुश्चक्रतुःसश्रीहरिःतयोर्भक्तिधर्मयोःइत्थम् जातमुसन्नम्
निजवपुर्नित्यस्वरूपयथार्थंज्ञातम् आज्ञायवधाअतुलस्कसवदिक्कःस्तयोरनुपमस्कर्तवंप्रदातुमिच्छन्सन्

नृपःकृष्णंवृंदावनकृतनिरीक्षंवकुमुदंनिरीक्ष्यापद्भक्तिर्विदधतुस्थोतत्स्तुतिमुभौ॥तयोरित्थंजातंनिजवपु
नमाज्ञायसहसाविशुर्ल्मकोऽपिभूदतुलस्कर्वदिक्कः मुदपया॥६२॥स्वस्तकंप्रातिपयुस्ततःपदंसेश्वराःप्रमु
दितादिवौकसः॥तन्मनोज्ञतररूपवीक्षणप्राप्तविस्मयनिमग्नचेतसः॥६४॥
इत्ययानिष्कारणास्मंतकारुण्येन
सहसान्तूर्णमेवसहसात्वतूर्णयोरित्यमरःनाकावेनराकृतिःविशुर्वालःअभूत्तत्रापतिस्य॥६५॥सेतिततस्तद
नंतरम् तस्यश्रीहरेःमनोज्ञतरमतिमनोरमंयद्रूपंतस्यवीक्षणंदर्शनंतेनप्राप्तेविस्मयेऽसाश्चर्येनिमग्नानिश्रूढ्ता
निचेतांसियेषांतेस्कंदरुचिरंचारुस्कपमंमाधुर्यशोभनम् कांतंमनोरमंरूच्यंमनोज्ञंमंजुमंजुलमित्यमरःविस्मयश्चि

हरिसं· ॥१८॥

त्रमद्भुतम् चोटनाश्चर्यैर्द्दनिर्हैमः सेश्वराब्रह्मशिवादीश्वरसहिताः दिवौकसो देवाः प्रमुदिताः संजातप्रकृष्टानंदाः सर्ग·६
सं ततः स्वस्वकं स्वकीयं स्वकीयं पदं स्थानम् पदं गृहे चवाच्ये व्यवसायप्रदेशयोः पादनचिह्नयोः स्थानत्राणयोरंकेच
स्कन्नोरितिमेदिनी प्रतियपुर्जग्मुः रथोद्धताद्वृत्तम् रोनराविह रथोद्धतालगाविति लक्षणात् ॥ ६४ ॥ तमिति अथानं
तरम् भक्तिर्धर्मगृहिणी तंबालभावंप्राप्तम् प्रभुं श्रीहरिम् स्वतः स्वेन आत्मनेतियावत् सोङ्गानावात्मनिस्वमित्यम
रः प्रसूतंसर्वप्राणिवत्स्तनप्रसवम् अविदत्तु बुध्येकृतः पुत्रः जातोभक्त्यामुत्पन्नः इतीत्थंभूतः योषितांप्रसूतिस

तंप्रसूतमविदत्स्वतः प्रभुं भक्तिरासकिलयोषितांरवेः ॥ जातइत्यथसुतः सुधोपमंतंनिशम्यमुमुदेभृत्रांवृषः ॥ ६५
इतिश्रीहरिसं॰ महाकाव्ये कविश्री प्रसादसा· वर्णितेश्रीहरिप्रादुर्भावोक्तिनामाषष्ठः सर्गः ॥ ६ ॥ प्रयेभक्तिनि

कटस्थितनारीणांमुखः शुश्रुः आसबभूव आसेतिवभूवेसर्थेः अयम् कलिस्कधोपममम्तसमानमतंरवम् नि
शम्यमंगलवाविकहारिणाः सकाशात्तश्रुत्वाभृशामसंतम् मुमुदे हृष्टोबभूवपूर्वश्लोकोक्तमेवदृत्तम् ॥ ६५ ॥ इ
तिश्रीपद्वाक्यप्र·पारा·धुरी·विश्व·महात्मजदीना·विश्वप्रसस्नता·श्रीसह·चरणकमलोपासकगोपा·मुमंव
र्तितमतिमाध·सत्स·आमा·दया·श्रीहरिहर्षैकभक्तभोला·इतोश्रीहरिसं·विरुक्त॰षष्ठः सर्गः ॥ ६ ॥ श्री ॥ ॥१८॥

लि·एवलजैवामोएरजि स·१९५६ महावदि४नेदिवसेमेयाणग्रामेसमाप्त